# kakArAdi shrI kalkyaShTottarashatanAmastotram

# કકારાદિ શ્રીકલ્ક્યષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : kakArAdi kalkya108nAmastotram

File name : kakArAdikalkya108nAmastotram.itx

Category : aShTottarashatanAma, vishhnu, dashAvatAra, paNDita-bellaMkoNDa-rAmarAya-kavIndra, vishnu

Location : doc_vishhnu

Author : paNDita shrI bellaMkoNDa rAmarAya kavIndra

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : shrI dashAvatArAShTottara shatanAmAvaliH savyAkhyA

Latest update : January 24, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# કકારાદિ શ્રીકલ્ક્યષ્ટોત્તરશતનામસ્તોત્રમ્

શ્રી હયગ્રીવાય નમઃ ।

હરિઃ ૐ

કલ્કી કલ્કી કલ્કિહન્તા કલ્કિજિત્કલિમારકઃ ।
કલ્ક્યલભ્યઃ કલ્મષઘ્નઃ કલ્પિતક્ષોણિમઙ્ગલઃ ॥ ૧॥

કલિતાશ્વાકૃતિઃ કન્તુસુન્દરઃ કઞ્જલોચનઃ ।
કલ્યાણમૂર્તિઃ કમલાચિત્તચોરઃ કલાનિધિઃ ॥ ૨॥

કમનીયઃ કલિનિશાકલ્યનામા કનત્તનુઃ ।
કલાનિધિસહસ્રાભા કપર્દિગિરિસન્નિભઃ ॥ ૩॥

કન્દર્પદર્પદમનઃ કણ્ઠીરવપરાક્રમઃ ।
કન્ધરોચ્ચલિતશ્વેતપટાનિર્ધૂતકન્ધરઃ ॥ ૪॥

કઠોરહેષાનિનદત્રાસિતાશેષમાનુષઃ ।
કવિઃ કવીન્દ્રસંસ્તુત્યઃ કમલાસનસન્નુતઃ ॥ ૫॥

કનત્ખુરાગ્રકુલિશચૂર્ણીકૃતાખિલાચલઃ ।
કચિત્તદર્પદમનગમનસ્તમ્ભિતાહિપઃ ॥ ૬॥

કલાકુલકલાજાલચલવાલામલાચલઃ ।
કલ્યાણકાન્તિસન્તાન પારદક્ષાલિતાખિલઃ ॥ ૭॥

કલ્પદ્રુકુસુમાકીર્ણઃ કલિકલ્પમહીરુહઃ ।
કચન્દ્રાગ્નીન્દ્રરુદ્રાદિ બુધલોકમયાકૃતિઃ ॥ ૮॥

કઞ્જાસનાણ્ડામિતાત્મપ્રતાપઃ કન્ધિબન્ધનઃ ।
કઠોરખુરવિન્યાસપીડિતાશેષભૂતલઃ ॥ ૯॥

કબલીકૃતમાર્તાણ્ડહિમાંશુકિરણાઙ્કુરઃ ।
કદર્થીકૃતરુદ્રાદિવીરવર્યઃ કઠોરદૃક્ ॥ ૧૦॥

કવિલોકામૃતાસાર વર્ષાચિતદૃગાવલિઃ ।
કદાત્માયુર્ધૃતગ્રાહિકોપાગ્નિરુચિદૃક્તતિઃ ॥ ૧૧॥

કઠોરશ્વાસનિર્ધૂતખલતૂલાવૃતામ્બુધિઃ ।
કલાનિધિપદોદ્ભેદલીલાકૃતસમુત્પ્લવઃ ॥ ૧૨॥

કઠોરખુરનિર્ભેદક્રોશદાકાશસંસ્તુતઃ ।
કઞ્જાસ્યાણ્ડભિભિત્યોર્ધ્વદૃષ્ટિશ્રુતિયુગાદ્ભુતઃ ॥ ૧૩॥

કનત્પક્ષદ્વયવ્યાજ શઙ્ખચક્રોપશોભિતઃ ।
કદર્થીકૃતકૌબેરશઙ્ખશ્રુતિયુગાઞ્ચિતઃ ॥ ૧૪॥

કલિતાંશુગદાવાલઃ કણ્ઠસન્મણિવિભ્રમઃ ।
કલાનિધિલસત્ફાલઃ કમલાલયવિગ્રહઃ ॥ ૧૫॥

કર્પૂરખણ્ડરદનઃ કમલાબડબાન્વિતઃ ।
કરુણાસિન્ધુફેનાન્તલમ્બમાનાધરોષ્ટકઃ ॥ ૧૬॥

કલિતાનન્તચરણઃ કર્મબ્રહ્મસમુદ્ભવઃ ।
કર્મબ્રહ્માબ્જમાર્તાણ્ડઃ કર્મબ્રહ્મદ્વિરર્દનઃ ॥ ૧૭॥

કર્મબ્રહ્મમયાકારઃ કર્મબ્રહ્મવિલક્ષણઃ ।
કર્મબ્રહ્માત્યવિષયઃ કર્મબ્રહ્મસ્વરૂપવિત્ ॥ ૧૮॥

કર્માસ્પૃષ્ટઃ કર્મહીનઃ કલ્યાણાનન્દચિન્મયઃ ।
કઞ્જાસનાણ્ડજઠરઃ કલ્પિતાખિલવિભ્રમઃ ॥ ૧૯॥

કર્માલસજનાજ્ઞેયઃ કર્મબ્રહ્મમતાસહઃ ।
કર્માકર્મવિકર્મસ્થઃ કર્મસાક્ષી કભાસકઃ ॥ ૨૦॥

કચન્દ્રાગ્ન્યુડુતારાદિભાસહીનઃ કમધ્યગઃ ।
કચન્દ્રાદિત્યલસનઃ કલાવાર્તાવિવર્જિતઃ ॥ ૨૧॥

કરુદ્રમાધવમયઃ કલાભૂતપ્રમાતૃકઃ ।
કલિતાનન્તભુવન સૃષ્ટિસ્થિતિલયક્રિયઃ ॥ ૨૨॥

કરુદ્રાદિ તરઙ્ગાધ્યસ્વાત્માનન્દપયોદધિઃ ।
કલિચિત્તાનન્દસિન્ધુસમ્પૂર્ણાનઙ્ગચન્દ્રમાઃ ॥ ૨૩॥

કલિચેતસ્સરોહંસઃ કલિતાખિલચોદનઃ ।
કલાનિધિવરજ્યોત્સ્નામૃતક્ષાલિતવિગ્રહઃ ॥ ૨૪॥

કપર્દિમકુટોદઞ્ચદ્ગઙ્ગાપુષ્કરસેવિતઃ ।
કઞ્જાસનાત્મમોદાબ્ધિતરઙ્ગાર્દ્રાનિલાર્ચિતઃ ॥ ૨૫॥

કલાનિધિકલાશ્વેતશારદામ્બુદવિગ્રહઃ ।
કમલાવાઙ્મરન્દાબ્ધિફેનચન્દનચર્ચિતઃ ॥ ૨૬॥

કલિતાત્માનન્દભુક્તિઃ કરુઙ્નીરાજિતાકૃતિઃ ।
કશ્યપાદિસ્તુતખ્યાતિઃ કવિચેતસ્સુમાર્પણઃ ॥ ૨૭॥

કલિતાકારસદ્ધર્મઃ કલાફલમયાકૃતિઃ ।
કઠોરખુરઘાતાત્તપ્રાણાધર્મવશુઃ કલિજિત્ ॥ ૨૮॥

કલાપૂર્ણીકૃતવૃષઃ કલ્પિતાદિયુગસ્થિતિઃ ।
કમ્રઃ કલ્મષપૈશાચમુક્તતુષ્ટધરાનુતઃ ॥ ૨૯॥

કર્પૂરધવલાત્મીય કીર્તિવ્યાપ્તદિગન્તરઃ ।
કલ્યાણાત્મયશોવલ્લીપુષ્પાયિતકલાનિધિઃ ॥ ૩૦॥

કલ્યાણાત્મયશસ્સિન્ધુ જાતાપ્સરસનર્તિતઃ ।
કમલાકીર્તિગઙ્ગામ્ભઃ પરિપૂર્ણયશોમ્બુધિઃ ॥ ૩૧॥

કમલાસનધીમન્થમથિતાનન્દસિન્ધુભૂ ।
કલ્યાણસિન્ધુઃ કલ્યાણદાયી કલ્યાણમઙ્ગલઃ ॥ ૩૨॥

॥ ઇતિ કકારાદિ કલ્ક્યષ્ટોત્તરશતનામમૂલં લિખિતં રામેણ
પરાભવાશ્વયુજ બહુલ ચતુર્થ્યામ્ સમર્પિતં ચ
શ્રીમતે હયગ્રીવાય દેવાય ॥

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

Source Book:
shrI dashAvatArAShTottarashatanAmAvaliH savyAkhyA
language: Telugu
Composed by : paNDita shrI bellaMkoNDa rAmarAya kavIndra

*kakArAdi shrI kalkyaShTottarashatanAmastotram*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*